दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शिशिर-ऋतुः
सूर्यः उत्तरायणम् माघशुक्लद्वादशी
माघ 17 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-6 ■ वर्ष-5 ■ अङ्क-99 | 1 | जनवरी 30, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 आवधिक-श्रम-बल-सर्वेक्षणे आजीविकायाः स्थितिः सुदृढा अभवत् - बी.अनन्त-नागेश्वरन

4 मनुष्येष्वपि अधुना वनस्पतिरोगाः प्रसारं कुर्वन्ति, चिन्ता वर्धते- कृषि-विशेषज्ञानां अध्ययनात् उद्घाटनम्

6 भारतीयभाषाणां निनादः- राष्ट्रियसंगोष्ठ्यां विदुषां सार्थकसंवादः

## सर्वोच्चन्यायालयेन विश्वविद्यालय-अनुदान-आयोगस्य विनियमः, 2026 इत्येषः स्थगितः



सर्वोच्चन्यायालयेन विश्वविद्यालय-अनुदान आयोगाय आदेशः दत्तः यत् (उच्च-शिक्षण-संस्थानां समता-संवर्धनम्) विनियमः, 2026 इत्येषः स्थगितः भवेत् । न्यायालयेन विनियमानां विषये काश्चित् आपत्तयः प्रकटिताः, याः सामान्यवर्गस्य प्रति भेदभावयुक्ताः भवितुं शक्नुवन्ति। न्यायालयेन सूचितं यत् प्रख्यात न्यायविदानां समित्या विनियमानां पुनरवलोकनं कर्तव्यम् । न्यायालयः अवदत् यत् विनियमाः प्रथमदृष्ट्या अस्पष्टाः, दुरुपयोगाय समर्थाः च सन्ति । न्यायालयः 2026 विनियमस्य संवैधानिकतायाः विरोधं कुर्वतां तिसृणां रिट्-याचनानां पक्षे विचारं कुर्वन् आसीत् । सर्वोच्चन्यायालयेन केन्द्राय विश्वविद्यालय-अनुदान-आयोगाय च याचिकानां विषये सूचना दत्ता, या मार्चमासस्य नवदश-दिनाङ्के प्रत्यर्पणीया आसीत्। तावत्पर्यन्तं नवनिर्मिताः नियमाः स्थगिताः सन्ति। न्यायालयेन इतोऽपि आदेशः दत्तः यत् द्वाविंशत्युत्तर-द्विसहस्रतमाब्दस्य विनियमाः तावन्मध्ये प्रवर्तयिष्यन्ते ।

## भारत-यूरोपीयसङ्घयोः मध्ये जातम् ऐतिहासिकं मुक्तव्यापार-सन्धिः प्रशंसिता प्रधानमन्त्रिणा नरेन्द्रमोदिना

प्रधानमन्त्रिणा नरेन्द्रमोदिना भारत-यूरोपीयसङ्घयोः मध्ये जातम् ऐतिहासिकं मुक्तव्यापार-सन्धिः प्रशंसिता अस्ति । अस्य सन्धेः महत्त्वं प्रकाशयन्, श्रीमोदी, महत्त्वाकांक्षि-भारतस्य कृते, महत्त्वाकांक्षि-यपूनां कृते, आत्म-निर्भर-भारतस्य कृते च मुक्तव्यापारः इत्यस्य वर्णनम् अकरोत्। आय-व्ययक-सत्रस्य द्वितीये दिवसे नवदेहल्यां संसदभवन-परिसरे प्रधानमन्त्री प्रसारमाध्यमान् सम्बोधयन् आसीत् । श्रीमोदी सर्वान् संसद-सदस्यान् राष्ट्रस्य विकासाय रचनात्मक रूपेण कार्यं कर्तुं प्रार्थयत् ।

## वित्तमंत्री निर्मलासीतारमणवर्या संसदि विंशति-पञ्चविंशति-प्रतिविंशति आर्थिकसर्वेक्षणं प्रस्तुतवती



आगामि-वित्तीयवर्षे देशस्य जीडीपी इति सकलगृहोत्पादस्य वृद्धिमितिः सप्त-दशमलव चत्वारि-प्रतिशन्मितं यावत् भवितुं शक्नोति । सप्तविंशत्युत्तर-द्विसहस्रतमाब्दे देशस्य आर्थिकवृद्धिः षट्-दशमलव-अष्ट-प्रतिशन्मितततः सप्त-दशमलव-द्वे प्रतिशन्मितं यावत् भवितुम् अर्हति । वित्तमन्त्री निर्मलासीतारमण-वर्यया अद्य संसदि उपस्थापितायां आर्थिकसमीक्षायां एतत् प्रख्यापितम् अस्ति। आर्थिक सर्वेक्षणानुसारं, भारतीय अर्थव्यवस्था षड्-विंशत्युत्तर-द्विसहस्रतमे वित्तीयवर्षे प्रबल-वृद्धि-गतिं प्राप्नोति । प्रथम-अग्रिमेषु अनुमानेषु जी. डी. पी. इत्यस्य वास्तविक वृद्धिः सप्त-दशमलव चत्वारि-प्रतिशन्मितं अस्ति, यस्य वृद्धिः बहुधा देशीय-आग्रहात् प्रेरिता भवति। निजोपभोगः, अर्थ-निर्माणम् च विस्तारस्य समर्थनं निरन्तरं कुरुतः, परन्तु आपूर्ति-पक्षे सेवाः प्रमुख-योगदान-कर्तारः एव तिष्ठन्ति । अपरत्र देशे उत्पादन-क्रियाकलापः सुदृढः अभवत्, कृषिः च स्थिरतां प्रायच्छत् । सर्वेक्षणे इदमपि उल्लेखितम् यत् वैश्विक आर्थिक पर्यावरणं अनिश्चितम् अस्ति, भू-राजनैतिक-व्यवधानैः, प्रमुखासु अर्थव्यवस्थासु व्यापार-व्यवधानैः च निर्मितम् अस्ति। आर्थिक-समीक्षया इदमपि सूचितं यत् देशस्य सद्यः कृत-आर्थिक-प्रदर्शनं प्रादर्श्यत यत् अशान्ते वैश्विकार्थिक-वातावरणे अपि स्थूल-आर्थिक स्थिरतां वृद्धिं च धारयितुं शक्यते । आर्थिक सर्वेक्षणं देशस्य वर्तमान-आर्थिक स्थित्याः भविष्य-दृष्टिकोणस्य च समग्र-समीक्षा अस्ति ।

## महाराष्ट्रस्य उपमुख्यमन्त्रिणः अजितपवारः इत्यस्य च अन्तिमसंस्कारः पुणे-नगरस्य बारामती-नगरे राजकीय-सम्मानेन सह अभवत्



महाराष्ट्रस्य उपमुख्यमन्त्रिणः, राष्ट्रवादि-कॉन्ग्रेस-दलस्य अध्यक्षः अजितपवारः इत्यस्य च अन्तिमसंस्कारः पुणे-नगरस्य बारामती-नगरे राजकीय-सम्मानेन सह अभवत् । अवधेयमस्ति यत् बारामती-विमानस्थानकस्य समीपे विमान दुर्घटनायां एन्. सी. पी. प्रमुखः, अन्ये च चत्वारः जनाः मृताः अभवन्। तस्य पुत्री पार्थः जयः च विद्या-प्रतिष्ठान-क्षेत्रे अन्तिमसंस्कारं कृतवन्तौ। केन्द्रस्य राज्यस्य च अनेके वरिष्ठनेतारः अन्त्येष्टिक्रियायां भागम् अगृह्णन् । एतेषु केन्द्रीयमन्त्री अमितशाहः, नितिनगडकरी, महाराष्ट्रस्य मुख्यमन्त्री देवेन्द्र फड्नविसः, उपमुख्यमन्त्री एकनाथ शिन्दे, भाजपा-दलाध्यक्षः नितिन-नबीनः, एन्. सी. पी. दलप्रमुखः शरद पवारः, अन्ये बहवः नेतारः च आसन्। विमान दुर्घटना-अन्वेषण-विभागः दुर्घटनायाः कारणं ज्ञातुं अन्वेषणं प्रारभत। नागरिक विमानयान-मन्त्रालयः अद्य सूचितवान् यत् दुर्भाग्यपूर्णस्य विमानस्य कृष्णपेटिका पुनः प्राप्ता । मन्त्रालयः अवदत् यत्, अन्वेषणं द्रुतगत्या प्रचलति तथा पूर्णतया पारदर्शकं, कालबद्धं च अन्वेषणं सर्वकारस्य सर्वोच्चप्राथमिकता अस्ति ।

## भारत-कनाडा-देशयोः सहयोगं सुदृढं कर्तुम् उपायेषु विचाराणाम् आदानं प्रदानं च कृतवान् पीयूषगोयलः

हिमसंस्कृतवार्ता। केन्द्र-वाणिज्य-उद्योग-मन्त्री पियूष गोयल-वर्यः परस्परविकासाय समृद्धये च भारत-कनाडा-देशयोः सहयोगं सुदृढं कर्तुम् उपायेषु विचाराणाम् आदानं प्रदानं च कृतवान् । नवदिल्ल्यां कनाडा-देशस्य ऊर्जा-प्राकृतिक-संसाधन मंत्री श्री-टिम-हॉजसन इत्यनेन सह उपवेशनावधौ उभयपक्षौ ऊर्जासुरक्षायाः, महत्वपूर्णखनिजपदार्थानां, नवीकरणीयोर्जायाः च विषयेषु चर्चा कृतवन्तौ ।

## सुभाषितम्

**ऋणं मित्रान्न कर्तव्यं,**
**न देयं चापि मित्रके।**
**प्रीतिच्छेदकरी ज्ञेया,**
**यस्माद्द्वै ऋणकर्तरी।।**
**-महासुभाषितसंग्रह**

भावार्थः- अपने किसी मित्र से ऋण नहीं लेना चाहिए तथा किसी मित्र को ऋण देना भी नहीं चाहिए क्योंकि सर्वविदित है कि ये दोनों प्रकार के ऋण एक कैंची के समान मित्रता के बन्धन को काट देते हैं।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## सप्तसप्तति-तमस्य गणतन्त्रसमारोहस्य समापनं निदर्शयन् बीटिङ्ग्-रिट्रीट्-समारोहः नवदेहल्याः विजयचौके सम्पन्नोऽभवत्

सप्तसप्तति-तमस्य गणतन्त्र-समारोहस्य समापनं निदर्शयन् बीटिङ्ग्-रिट्रीट्-समारोहः नवदेहल्याः विजयचौक इत्यत्र सम्पन्नोऽभवत् । अस्मिन् अवसरे राष्ट्रपतिः द्रौपदीमुर्मुः, उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी, रक्षामंत्री राजनाथसिंहः, अन्ये केन्द्रीयमन्त्रिणः च उपस्थिताः आसन् । अस्मिन् समारोहे भारतस्य जल-स्थल-वायु-सेनानां वैण्ड-दलैः सह केन्द्रीय सशस्त्र-बल-सैन्यस्य दलमपि सशस्त्रसेनायाः अनुशासनं, ऐक्यं, कालातीतं आचरणं च प्रतिबिम्बयन्ती वैण्ड इत्यस्य प्रस्तुतिं अकरोत् । अस्यां प्रस्तुतौ समृद्ध सैन्यपरम्परायाः बलस्य च प्रदर्शनं अपि सञ्जातम् ।

# केन्द्रीयसर्वकारेण युरोपीयसंघस्य सेवोपार्जनकरः न्यूनीकृतः



## राठौरः उक्तवान्- एतत् बागवानैः सह अन्यायः।

हिमसंस्कृतवार्ताः- शिमला।हिमाचलप्रदेशस्य सेवबागवानेषु मोदीसर्वकारेण अन्यः प्रहारः कृतः। केन्द्रेण यूरोपीयसंघस्य सेवस्यान्तर्गतम् आयातकरः पञ्चाशत् प्रतिशतात् विंशतिप्रतिशतपर्यन्तं न्यूनीकृतः। एतद् कारणेन बागवानानां चिन्ता वर्धते। पूर्वमेव मोदीसर्वकारेण न्यूजीलैण्डस्य सेवस्यान्तर्गतम् पञ्चविंशति- प्रतिशतकरः स्थापितः। एतेषां निर्णयेषु हिमाचलस्य पञ्चसहस्रपञ्चशतकोट्यधिकस्य सेब-आर्थिकी संकटे पतिता। प्रधानमंत्रीभूत्वा २०१४ तमे वर्षे नरेन्द्रमोदिना सुजानपुररैलीमध्ये विदेशीसेवास्यान्तर्गतम् आयातकरः शतप्रतिशतस्य कर्तुं प्रतिज्ञा कृताऽभवत्, किन्तु प्रतिपत्तेः विपरीतं जातम्।
अखिलभारतीय- कांग्रेसकमेट्येके प्रवक्ता ठियोगविधानसभाविधायकः कुलदीपसिंहराठौरः यूरोपीयदेशैः सह फलानां विशेषतः सेबस्य आयातशुल्कं विंशतिप्रतिशतपर्यन्तं न्यूनीकृतम् दुर्भाग्यपूर्णं इति उक्तवान्। तेन उक्तम्- एषः प्रदेशस्य सेवबागवानै सह महद् अन्यायः। भारतसर्वकारेण न्यूजीलैण्डस्य सह अपि आयातशुल्कं न्यूनीकृतम्, अद्य युरोपीयदेशैः अपि आयातशुल्कं न्यूनीकृतं, विशेषतः हिमाचलादिषु पर्वतीयप्रदेशेषु, यत्र आर्थिकीः फलं विशेषतः सेबस्य आधारभूतः, स्वराजनीतिकलाभाय विनष्टः।
राठौरः गुरुवासरे प्रकाशिते वक्तव्ये केन्द्रसरकारे आरोपं यच्छति- सा अमेरिका-प्रभावेण देशस्य आर्थिकी विनाशाय सज्जा। तेन उक्तम्- प्रदेशे पञ्चसहस्रकोट्यधिकस्य सेब- आर्थिकी संकटेन आवृता, केन्द्रसर्वकारस्य कृषकबागवानविरोधिन्याः नीतिभिः तस्य अस्तित्वम् अपि संकटे। तेन आशङ्का व्यक्ता– हालैः भारत-अमेरिकायाः मुक्तव्यापारसंविदायाः अन्तर्गतं अन्येषां राष्ट्रैः अपि एतेषां प्रकारस्य संविद् कृत्वा हिमाचलादिस्वरूपेषु सेबोत्पादनं च तस्य विप्पणी च विनष्टं कुर्वन्ति। राठौरः केन्द्रसर्वकारेण विदेशात् आगच्छन्ति फलेषु आयातशुल्कं शतप्रतिशतं कर्तुं पुनः आह्वानं कृतवान्। सः प्रधानमंत्रिणः प्रदेशस्य सेबबागवानेभ्यः प्रतिज्ञातानि वचनानि पालनं कर्तुं आहूतवान्।

### सेब- आर्थिकी हिमाचलस्य जीवनरेखा, आयातनीतौ बागवानहितानाम् उपेक्षा न कर्तव्या- संदीपनी

भाजपाप्रवक्ता संदीपनी भारद्वाजः प्रदेशस्य सेबोत्पादकानां चिन्तायाः विषये उक्तवान्– हिमाचलस्य सेबाधारिता आर्थिकी प्रदेशस्य जीवनरेखा अस्ति, बागवानहितानां रक्षणं भाजपा- केन्द्रसरकारयोः सर्वोच्च प्राथमिकता अस्ति। तेन स्पष्टं कृतम्। मोदीसर्वकार हिमाचल, जम्मू- कश्मीर, उत्तराखण्डेषु सेबोत्पादकानां सह पूर्णबलम् अवस्थितम् अस्ति, यत्र कस्यापि परिस्थितौ तेषां हितस्य संविद् न भविष्यति।
संदीपनी भारद्वाजः उक्तवान्– गतकाले यूरोपीयसंघेन सह निष्कासितं फ्री- ट्रेड- एग्रीमेंट सम्बन्धिनः बागवानमानसस्य मध्ये यानि प्रश्नानि चिन्ताः च, तानि सर्वकार गंभीरतया ग्रहीष्यति। सेबोत्पादनं केवलं एकं फलं न, किन्तु प्रदेशस्य आर्थिकी, रोजगारः, लक्षाधिकपरिवाराणां आजीविका च मुख्याधारः। अतः हिमाचलीसेबस्य उचितमूल्यं संरक्षणं च आवश्यकम्।सः उक्तवान्– फ्री- ट्रेड- एग्रीमेंटस्य क्रियान्वयनं २०२७ तमे वर्षे आरम्भः, तस्मिन् समये सर्वकारकृते बागवानहितं रक्षितुम् प्रभावी उपायाः स्वीकरिष्यन्ते। न्यूनतम- आयातमूल्यं, गुणवत्ता मानकाः, बाजारनियन्त्रणम्, सुरक्षा प्रावधानाः च माध्यमेन सुनिश्चितं भविष्यति यत् विदेशीसेबस्य आयातेन हिमाचलोत्पादकानां नाशः न जायते।भाजपाया स्पष्टमतम्- हिमाचलस्य सेबोत्पादकाः वैश्विकस्पर्धायाम् दुर्बलाः न भविष्यन्ति। सर्वकार बागवानसहित संवादं स्थापयित्वा तेषाम् आशंकाः निराकुर्वन्ति, सेबोद्योगं संरक्षितुं सर्वनीतिगत उपायाः स्वीकरिष्यन्ति। केन्द्रसर्वकार सुनिश्चितयिष्यति यत् हिमाचलस्य सेवायै उचितमूल्यम्, उत्तमबाजारः, संरक्षणं च लभ्यताम्। हिमाचलस्य सेवोत्पादकानां हितः सर्वोपरि, मोदीसर्वकार तेषाम् अधिकाराणां, सुरक्षा च समृद्धये सर्वाः आवश्यकाः पगः गृहीत्वा भविष्यति।

# आवधिक-श्रम-बल-सर्वेक्षणे आजीविकायाः स्थितिः सुदृढा अभवत् - बी.अनन्त-नागेश्वरन



मुख्य-आर्थिक-परामर्शदः बी.अनन्त-नागेश्वरन् वर्यः अवदत् यत् आवधिक-श्रम-बल-सर्वेक्षणस्य आरम्भात् आरभ्य देशे आजीविकायाः स्थितिः सुदृढा अभवत् । आर्थिक सर्वेक्षणम् 2025-26 इत्यस्मिन् विषये कथयन् श्री-नागेश्वरन्-वर्यः अवदत् यत्, 2023-24 तमे वर्षे निरुद्योगस्य मितिः षट्-प्रतिशन्मितत:, त्रि-दशमलव-द्वे प्रतिशन्मितं यावत् न्यून अभवत् । सः अवदत् यत्, महिला-श्रम-बलस्य सहभागित्वं प्रायः अष्टादश-प्रतिशन्मितैः अङ्कैः वर्धितम् अस्ति। सी. ई. ए. इत्यनेन अवदत् यत्, वर्षस्य प्रथम-नवमासेषु निरुद्योगस्य मितिः अन्तिम त्रैमासिके निरन्तरं पञ्च-दशमलव चत्वारि-प्रतिशन्मितत:, चत्वारि-दशमलव-नवप्रतिशन्मितं यावत् न्यूना अभवत् ।



### सप्ताहान्ते आवास-उपयोगिता वर्धिष्यते

होटल- एण्ड- रेस्तरां- एसोसिएशनस्य उपाध्यक्षः प्रिन्स कुकरेजा महोदयः अवदत् यत् हिमपातानन्तरं नगरे पर्यटकानां संख्यावृद्ध्या व्यवसायः वेगं प्राप्तवान्। सप्ताहान्ते होटलेषु आवास-उपयोगिता अधिकं वर्धिष्यते।पुलिस-विभागः अपि अवदत् यत् प्रातःकाले मार्गेषु स्खलनम् अधिकं भवति, अतः वाहनानि मन्दगत्या चालयन्तु। शक्ये सति सूर्यप्रकाशस्य अनन्तरं एव तादृशेषु मार्गेषु गमनं करणीयम्।शिमला- जनपदे अद्यतन-हिमपातस्य कारणेन मार्ग- पुनर्बहाली- कार्ये बाधाः सन्ति। शिमला- रामपुर- हाटकोटी-राजमार्गः बुधवासरे सायं यातायाताय पुनर्बहालः कृतः इति कथ्यते, तथापि अनेकेषु स्थानेषु स्खलनं वर्तते, येन वाहनानि अवरुद्धानि भवन्ति।जनपदे अद्यापि प्रायः १०० मार्गाः अवरुद्धाः सन्ति। लोकनिर्माण-विभागेन मुख्य-मार्गाः प्रायः बहालाः कृताः, किन्तु स्खलनस्य कारणेन वाहनानि हिमे फसन्ति। नारकण्डापर्यन्तं लघु-वाहनानाम् आवागमनम् आरब्धम् अस्ति। चौपाल-देहा-मार्गे हिमापनयनकार्यं प्रचलति, यस्य बहाली एक-द्विदिनाभ्यां सम्भाव्यते। एतेषु क्षेत्रेषु एच. आर. टी. सी. बससेवाः अपि बाधिताः। शिमला-जनपदे बुधवासरे सायं ६ वादनपर्यन्तं ५८८ विद्युत्- परिवर्तकाः अपि निष्क्रियाः आसन्, येन अनेकेषु ग्रामेषु विद्युत्-अभावः (ब्लैक-आउट) प्रवर्तते। विद्युत्-मण्डलस्य दलानि निरन्तरं कार्ये संलग्नानि सन्ति।
शिमलानगरे अपि बुधवासरे प्रातः मार्गेषु पादचारि- पथेषु च स्खलनं आसीत्। अद्यतन-हिमपातस्य कारणेन जाखू-लक्कड़- बाजार- बैनमोरक्षेत्रेषु प्रातःकाले वाहन-आवागमनं बाधितम् आसीत्, किन्तु अपराह्णे नगरनिगमः लोकनिर्माण- विभागश्च हिमं अपसार्य मार्गान् पुनःस्थापनम् कृतवन्तौ।

# हिमपातेन पर्यटन-व्यवसाये वृद्धिः, शिमला- कुफर्योः पर्यटकानां महासमागमः

हिमसंस्कृतवार्ताः- शिमला।
हिमाचलप्रदेशस्य राजधानी शिमलानगरे अद्यतनं हिमपातस्य अनन्तरं पर्यटन-व्यवसाये पुनरपि उल्लेखनीया वृद्धिः दृष्टिगोचरा जाता अस्ति। जनपदे मङ्गलवासरात्रौ सम्पन्नाया ऋतौ द्वितीयाया हिमवृष्टेः पश्चात् देशस्य विविधराज्येभ्यः बहुसंख्यकाः पर्यटकाः शिमलां, कुफरीं, नारकण्डां च आगच्छन्ति।रिज-प्रांगणात् सर्वतः उन्नताः पर्वतश्रेण्यः हिमेन आच्छादिताः सन्ति। जाखू-पर्वतशिखरमपि हिमपूर्णं दृश्यते। प्रतिदिनं शताधिकाः पर्यटकाः जाखू-पर्वते गत्वा हिमे क्रीडां कुर्वन्ति। शिमलां भ्रमणार्थं आगताः अधिकांशाः पर्यटकाः बिहार-गुजरात- पञ्जाब- महाराष्ट्रराज्येभ्यः सन्ति।सप्ताहान्तस्य पूर्वमेव नगरे स्थितानां होटलेषु कक्षाणां ६०– ७० प्रतिशतम् आरक्षणं सम्पन्नम् अस्ति। सप्ताहान्ते एषा संख्या १०० प्रतिशतं यावत् गन्तुं शक्नोति इति अनुमानः अस्ति। गुरुवासरे अपि रिजक्षेत्रं, माल-रोड च पर्यटकैः परिपूर्णं आसीत्। अस्मिन् अवसरे लघवः बालकाः हिमराशिषु क्रीडन्तः हर्षेण दृष्टाः।स्थानिक-व्यवसायिनः वदन्ति यत् हिमपातेन होटल-व्यवसायः, टैक्सी-सेवा, भोजनालयाः, वस्त्र- विपणयश्च उत्तमाम् आयं प्राप्नुवन्ति। दीर्घकालेन अनन्तरं पर्यटन-गतिविधिषु आगता एषा तीव्रता स्थानिकजनानां मुखेषु प्रसन्नतां जनयति। पर्यटन-विभागः प्रशासनं च पर्यटकानां सुरक्षां दृष्ट्वा यातायात-व्यवस्थां अन्याः आवश्यकाः सुविधाश्च सुदृढीकृतवन्तौ। पुलिस-विभागेन स्खलनयुक्तेषु मार्गेषु वाहनचालनं विषये निर्देशाः प्रकाशिताः।हिमदर्शनाय गुरुवासरे प्रसिद्धे पर्यटनस्थले कुफरीयां बहुसंख्यकाः पर्यटकाः आगताः, येन तत्र यातायात- अवरोधः उत्पन्नः। पर्यटकाः तत्र स्कीइङ- क्रीडायाः आनन्दं अलभन्त, हिमे च क्रीडां अकुर्वन्। मौसम-विभागस्य अनुसारं आगामिदिनेषु मौसमः स्वच्छः भविष्यति, येन पर्यटकानां संख्या अधिकं वर्धिष्यते।

# हमीरपुरे ११ विभागैः सह अत्याधुनिक- कर्कटरोग- चिकित्साकेन्द्रस्य स्थापना भविष्यति- मुख्यमन्त्री



**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् राज्यसर्वकारेण डॉ. राधाकृष्णन- राजकीय- चिकित्सा- महाविद्यालये (हमीरपुरे) एकस्य अत्याधुनिकस्य कर्कटरोग- चिकित्साकेन्द्रस्य स्थापनायाः निर्णयः स्वीकृतः। अस्मिन् केन्द्रे रोगिणां सौकर्याय ११ नूतनाः विशेषज्ञ- विभागाः स्थापयिष्यन्ते।

**११ प्रमुखाः विशेषज्ञविभागाः (Expert Departments)-**

## अस्मिन् केन्द्रे निम्नलिखित-विभागाः रोगिभ्यः विशिष्ट- सुविधाः प्रदास्यन्ति-

१. मेडिकल ऑन्कोलॉजी (Medical Oncology)
२. सर्जिकल ऑन्कोलॉजी (Surgical Oncology)
३. पीडियाट्रिक ऑन्कोलॉजी (बाल- कर्कटरोग- विज्ञानम्)
४. महिला- रोग- ऑन्कोलॉजी (स्त्री- कर्कटरोग- विज्ञानम्)
५. स्टेम सेल एवं बोन मैरो ट्रांसप्लांटेशन (Stem Cell & Bone Marrow Transplantation)
६. न्यूक्लियर मेडिसिन (Nuclear Medicine)
७. एनेस्थीसियोलॉजी एवं क्रिटिकल केयर (Critical Care)
८. ऑन्को पैथोलॉजी (Onco Pathology)
९. रेडियोलॉजी इमेजिंग (Radiology Imaging)
१०. रेडिएशन ऑन्कोलॉजी (Radiation Oncology)
११. पेन पैलिएशन (Pain Palliation)

**केन्द्रस्य प्रमुखाः विशेषांशाः-**

शय्या-क्षमता- इदं केन्द्रं २६४ शय्यायुक्तं (264 beds) भविष्यति, यत् पूर्णतः कर्कटरोगिभ्यः समर्पितं वर्तते।

सुविधा- अत्र ओपीडी (OPD), औषधालयः (Pharmacy), आपात्कालीन-कक्षः (Emergency Ward), क्लिनिकल- प्रयोगशाला (Clinical Lab) एकस्मिन्नेव स्थाने भविष्यन्ति।

विश्वस्तरीय-यन्त्राणि- 'एम्स-देहली' (AIIMS Delhi) इत्यस्य आधारभूत- प्रारूपानुसारं पुरातन- यन्त्राणां स्थाने विश्वस्तरीय- आधुनिक- यन्त्राणि स्थापयिष्यन्ते।

मुख्यमन्त्रिणा चिन्ता व्यक्तकृता यत् उत्तर-पूर्व- राज्यानां पश्चात् हिमाचले कर्कटरोगस्य प्रमाणं सर्वाधिकं वर्तते। अतः प्राथमिक- स्वास्थ्य- केन्द्रेभ्यः आरभ्य उच्च-स्तरीय-संस्थानां मध्ये उत्तमं समन्वयम् आवश्यकम् अस्ति। अनेन केन्द्रेण प्रदेशस्य जनानां कृते सुलभा गुणवत्तापूर्णा च चिकित्सा सुनिश्चितं भविष्यति।

# विपक्षस्य नेता जयरामठाकुरः भाजपा- राष्ट्रिय- अध्यक्षेण सह मिलितवान्; हिमाचलस्य राजनीतिविषये चर्चा जाता



**हिमसंस्कृतवार्ताः-** कार्यालयीयः प्रतिनिधिः।हिमाचलप्रदेशस्य पूर्वमुख्यमन्त्री विपक्षस्य नेता च जयरामठाकुरः गुरुवासरे देहल्यां भाजपायाः नवनियुक्त- राष्ट्रिय- अध्यक्षेण नितिन नबीन महोदेन सह शिष्टाचारमेलनं कृतवान्। अस्मिन् मेलने द्वयोः नेत्रोः मध्ये हिमाचलप्रदेशस्य राजनैतिक- परिदृश्यस्य, साङ्घटनिक- विषयाणां गभीरतया चर्चा अभवत्। जयरामठाकुरः राष्ट्रिय- अध्यक्षाय सूचितवान् यत् प्रदेशस्य कांग्रेस- सर्वकारस्य शासने कथं सर्वेषां वर्गाणां हितानां उपेक्षा भवति। सः विपक्षस्य रूपेण सर्वकारस्य विरुद्धं सञ्चालितानाम् आन्दोलनानां साङ्घटनिक- प्रयासाणां च विवरणं दत्तवान्।

## केन्द्रीय- आर्थिक- सर्वेक्षण- २०२५-२६ (Economic Survey): एकम् ऐतिहासिकाभिलेखम्

देहल्यां प्रसारमाध्यमैः (Media) सह भाषमाणः जयरामठाकुरः संसदि उपस्थापितं 'केन्द्रीय- आर्थिक- सर्वेक्षणं- २०२५-२६' प्रशंसितवान्। सः एतं अभिलेखं प्रधानमन्त्रिणः नरेन्द्रमोदी महोदयस्य सशक्तनेतृत्वस्य, 'विकसित भारतम् २०४७' सङ्कल्पस्य सिद्धेः आधारशिला इति वर्णितवान्।

**आर्थिक-सर्वेक्षणस्य प्रमुखाः अंशाः**

१. जीडीपी (GDP) वृद्धिः- वैश्विक-अनिश्चिततायाः मध्येऽपि भारतं विश्वस्य तीव्रतम-वर्धमाना अर्थव्यवस्था (Fastest Growing Economy) रूपेण उद्धृतम् अस्ति।
२. राजकोषीय-स्थिरता- विगतदशके निर्मिताः नीतिगतसंरचनाः अधुना 'आत्मनिर्भरतायाः' फलानि यच्छन्ति।
३. पूँजीगत-व्ययः (Capex): पूँजीगत-व्यये कृता विक्रमी-वृद्धिः हिमाचल-सदृश-पर्वतीय-राज्यानां कृते लाभप्रदा अस्ति, येन अत्र सम्पर्क-व्यवस्था (Connectivity), पर्यटनस्य नूतनयुगस्य च आरम्भः जातः।
४. जीविका-अवसराः- अधोसंरचना-विकासेन स्थानीय- युवकानां कृते अपाराः जीविका- अवसराः सृजिताः सन्ति।

# मण्डीनगरं चतुष्पंक्तिराज-मार्गेण सह योजयितुं सज्जता; सार्ध- षट्- कोटिरूप्यकाणां व्ययेन निर्मितः भविष्यति द्वि-पथ-मार्गः



**हिमसंस्कृतवार्ताः- लघ्वीकाशी मण्डी।** मण्डीनगरस्य विकासात्मककार्याणां श्रृङ्खलायां सदर- विधायकः अनिलशर्मामहोदयः मण्डीसमीपे बिन्द्राबनी क्षेत्रे भविष्यतः अत्याधुनिक- बसस्थानकस्य, क्रीडा- परिसरस्य (Sports Complex) कृते अधिकारिभिः सह भूमिचयनार्थं निरीक्षणं कृतवान्। मण्डीनगरस्य विधायकः अनिलशर्मामहोदयः नगरस्य सम्पर्कव्यवस्थां सुदृढां कर्तुं निम्नलिखित-योजनानां सूचनां दत्तवान् सः अकथयत् यत् मण्डीनगरं मलोरीसुरङ्गेण (Malori Tunnel) सह 'फोरलेन' मार्गेण योजयितुं ६.५० कोटिरूप्यकाणां व्ययेन एकस्य द्वि-पथ-मार्गस्य (Double Lane Road) प्रस्तावः सज्जीकृतः। अयं प्रस्तावः 'CRIF' (केन्द्रीय- सडक- अवसंरचना- कोषः) अन्तर्गतं सडक- परिवहन- मन्त्रालयं प्रति राज्यसर्वकारस्य माध्यमेन प्रेष्यमाणः अस्ति पड्डलक्षेत्रतः 'पुरानी मण्डी' पर्यन्तं निर्माणाधीनस्य रुग्णवाहन-सेतोः (Ambulance Bridge) विषये विधायकः लोकनिर्माणमन्त्री विक्रमादित्यसिंह महोदयेन सह मन्त्रणां कृतवान्। सः मन्त्रिणं स्मारितवान् यत् अस्य सेतोः शिलान्यासः तस्य स्वर्गतेन पित्रा राजा वीरभद्रसिंहेन कृतः आसीत्, परन्तु भूमि- अधिग्रहण- समस्यया एतद् कार्यं स्थगितम् आसीत्। विक्रमादित्यसिंहः तत्क्षणमेव अस्य 'डिमाण्ड- ड्राफ्ट' (Demand Draft) इत्यस्य स्वीकृतिं दत्तवान्। अस्मिन् प्रक्रमे 'जिमखाना क्लब' इत्यस्मै तथा अन्यास्मै एकस्मै निजी-पक्षाय प्रायः ८ कोटिरूप्यकाणां क्षतिपूर्तिराशिः (मुआवजा) प्रदास्यते। अनेन भूमि- विवादः समाप्तः भविष्यति तथा च अयं सेतुः शीघ्रमेव जनहितार्थं समर्पितः भविष्यति।

## विधायकस्य प्रमुखाः घोषणाः

अनिलशर्मा अकथयत् यत् फोरलेन' निर्माणकारणात् मण्डीनगरं सम्प्रति 'उपमार्गम्' जातमस्ति, अतः भविष्ये वाहनानि नगरस्य बहिः गमिष्यन्ति। एतदर्थं बिन्द्राबनीक्षेत्रे अत्याधुनिकस्य बसस्थानकस्य आवश्यकता भविष्यति। तथा स्कूल-बाजारतः टारना- सर्किट-हाउस-मार्गपर्यन्तं जंक्शनस्य विस्तारीकरणार्थं १.१८ कोटिरूप्यकाणां स्वीकृतिः दत्ता। वल्लभ- महाविद्यालयस्य प्राङ्गणे शिवरात्रि-महोत्सवे आगच्छतां देवी-देवतानां कृते सुविधायुक्तं स्थानं विकसितं भविष्यति। नगरनिगमेन बायपास-समीपे ९० लक्षरूप्यकाणां व्ययेन एकस्य अत्याधुनिक- शौचालयस्य निर्माणं क्रियते। अनिलशर्मा महोदयः एतेषां कार्याणां कृते मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू महोदयस्य तथा च विक्रमादित्यसिंहस्य आभारं प्रकटितवान्।



**हिमाचलदर्शनम्-बगलामुखी मन्दिरम्, कांगड़ा हि.प्र.**

# मनुष्येष्वपि अधुना वनस्पतिरोगाः प्रसारं कुर्वन्ति,

## चिन्ता वर्धते- कृषि-विशेषज्ञानां अध्ययनात् उद्घाटनम्



हिमसंस्कृतवार्ताः- शिमला। यावत् अधुना ये रोगाणवः केवलं वनस्पतिषु सीमिताः इति मन्यन्ते स्म, ते अधुना मनुष्येष्वपि संक्रमणं प्रसारयितुं समर्थाः भवन्ति। एतत् आश्चर्यजनकं तथ्यं Archives of Microbiology नामकस्य अन्तर्राष्ट्रीय- वैज्ञानिक- पत्रिकायां प्रकाशिते अध्ययने उद्घाटितम् अस्ति।

### एषः अध्ययनः "सीमाविहीनाः रोगजनकाः- वनस्पति-मनुष्ययोः

क्रॉस- किङ्गडम- प्रसारण- रणनीतयः तथा रोगोत्पादकता" इति शीर्षकेन प्रकाशितः। अस्मिन् शोधे वैज्ञानिकैः निर्दिष्टं यत् केचन वनस्पति-रोगजनकाः जीवाणवः, कवकाः (फङ्गस) तथा विषाणवः (वायरस) अवसरं लभमाना मनुष्य-शरीरमपि संक्रमितुं शक्नुवन्ति, विशेषतः तेषां जनानां येषां रोग-प्रतिरोधक-शक्तिः दुर्बला अस्ति। वैज्ञानिक- भाषायाम् एषा प्रक्रिया क्रॉस- किङ्गडम- प्रसारणम् इति कथ्यते, यस्यां रोगाणवः एकस्मात् जैविक-साम्राज्यात् (वनस्पतिभ्यः) अन्यस्मिन् (मनुष्येषु) संक्रमण-क्षमतां विकासयन्ति। अध्ययनानुसारं Pantoea, Burkholderia, Agrobacterium इत्यादयः जीवाणवः, Fusarium, Aspergillus, Curvularia इत्यादयः कवकाः न केवलं वनस्पतिभ्यः, अपि तु मानव- स्वास्थ्याय अपि संकटं जनयितुं शक्नुवन्ति। अतिरिक्तं, Tobacco Mosaic Virus, Pepper Mild Mottle Virus च इत्यादयः केचन वनस्पति-विषाणवः अपि मानवसंक्रमणेन सह सम्बद्धाः इति सूचितम् अस्ति।

### प्रतिवेदनात् अन्यदपि उद्घाटितम्

अस्मिन् प्रतिवेदने एतदपि प्रकाशं गतं यत् Salmonella तथा Escherichia coli (E. coli) इत्यादयः मानव-रोगजनक-जीवाणवः अधुना वनस्पतीनां मूलक्षेत्रे (Rhizosphere) पत्रक्षेत्रे (Phyllosphere) च अपि दृश्यन्ते। एतेन खाद्य-सुरक्षायाः विषये गम्भीराः प्रश्नाः उद्भूताः सन्ति, यतः अपक्व-शाकफल-सेवनेन एते रोगाणवः साक्षात् मानव-शरीरं प्रविशन्ति।

एषः अध्ययनः हिमाचलप्रदेशस्य प्रतिष्ठित- शैक्षणिक- संस्थाभ्यः सम्बद्धैः वैज्ञानिकैः संयुक्तरूपेण कृतः। शोधदले डॉ. नीतिका शर्मा, डॉ. जोगिन्द्र पाल, डॉ. ऋषि महाजन, डॉ. शालिनी चन्देल, डॉ. दीपिका सूद तथा डॉ. अञ्जली सान्सपाल इत्येते वैज्ञानिकाः सम्मिलिताः सन्ति। एतेषु बहवः वैज्ञानिकाः चौधरी- सरवणकुमार-हिमाचलप्रदेश- कृषि- विश्वविद्यालयस्य, पालमपुरस्थितस्य, वनस्पति-रोगविज्ञान-तथा सूक्ष्मजीवविज्ञान- विभागेन सह सम्बद्धाः सन्ति। डॉ. शालिनी चन्देल, श्रीसाईविश्वविद्यालयस्य, काङ्गडास्थितस्य, वनस्पतिविज्ञान- विभागात् सम्बद्धा अस्ति। कृषि- उद्यान- विभागस्य अधिकारिणः अस्य अध्ययनस्य गम्भीरतया विचारं कुर्वन्ति।

### वैज्ञानिकानां तर्काः

वैज्ञानिकाः वदन्ति यत् वनस्पति-मनुष्ययोः कोशिकासु केचन समानाः आणविकाः तथा कोशिकीय- संरचनाः सन्ति, यासां लाभं गृहीत्वा एते रोगाणवः नवीन-मेजबाने प्रवेशं कुर्वन्ति। जलवायु-परिवर्तनम्, वैश्वीकरणम्, अन्तर्राष्ट्रीय-व्यापारः, प्रतिरक्षा-दमनरोगाणां वृद्धिश्च एतानि कारणानि भविष्ये एतादृश-संक्रमणानां संकटम् अधिकं वर्धयितुं शक्नुवन्ति।

शोधकर्तारः उक्तवन्तः यत् अद्यापि एते घटनाः विरलाः सन्ति, तथापि ताः उपेक्षितुं न शक्यन्ते। एतस्य निवारणाय वैज्ञानिकैः वन-हेल्थ्-दृष्टिकोणः स्वीकरणीयः इति बलं दत्तम्, यस्मिन् मानवस्वास्थ्यं, वनस्पति-स्वास्थ्यं तथा पर्यावरणम् एते त्रयः एकत्र समन्वितरूपेण विचार्यन्ते।

# आईबैक्स-मृगेण सह युद्धे पराजितः

## हिम- चित्रकः (Snow Leopard);

### स्पीति- घाटीतः अद्भुतं दृश्यं सम्मुखम् आगतम्



हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः। स्पीति- उपत्यकायाः किब्बर-चिचम वन्यजीव- अभयारण्यात् प्रसारितस्य एकस्य चलच्चित्रस्य सामाजिकमाध्यमेषु (Social Media) महती चर्चा वर्तते। अस्मिन् चलच्चित्रे हिम-चित्रकः (Snow Leopard) एकस्य 'आईबैक्स' (Ibex) नामकस्य मृगस्य उपरि आक्रमणं कुर्वन् दृश्यते।

### घटनायाः विवरणम्-

सम्प्रति लाहौल-स्पीतिक्षेत्रं द्वि-चतुष्पाद- परिमित- हिमपातेन आच्छादितं वर्तते। अस्मिन् शीतकाले वन्यजीवाः आहारस्य जलस्य च अन्वेषणे उच्चशिखरेभ्यः अधोक्षेत्रान् प्रति आगच्छन्ति। यदा एकः 'आईबैक्स' आहारं अन्विष्यन् आसीत्, तदैव एकः हिम-चित्रकः छद्मवेषेण तस्य उपरि आक्रमणं कृतवान्। चित्रकः मृगस्य कण्ठं दृढतया गृहीतवान्, परन्तु हिमयुक्तायां ढालु-भूमौ सः तं जेतुं न शक्तवान्।

### मृगस्य प्राणरक्षाः-

प्रायः २०० मीटरपर्यन्तं सः मृगः चित्रकं हिमे कर्षित्वा पर्वतस्य अधोभागं प्रति नीतवान्। अन्ते मृगः स्वप्राणान् रक्षित्वा पलायने सफलः अभवत्।

### वनविभागस्य पुष्टिः-

काजा-क्षेत्रस्य वनमण्डलाधिकारी (DFO) गोल्डी छाबड़ा महोदयः अस्य चलच्चित्रस्य पुष्टिं कृतवान्। सः अवदत् यत् शीतकाले एवंविधानि दृश्याणि असामान्यं न भवन्ति। यदा महत्-हिमपातः भवति, तदा आखेटकपशुः, भक्ष्यपशुः च उभयौ अपि सीमितक्षेत्रेषु आगच्छतः, येन तयोः साक्षात् मेलनस्य सम्भावना वर्धते। सः एतत् दृश्यं हिमालयस्य पारिस्थितिकी-सन्तुलनस्य (Natural Balance) एकं श्रेष्ठम् उदाहरणं मन्यते।

# संस्कृतसाधकान् सज्जीकर्तुं संस्कृतसंस्थानेन आयोजितं दशदिनात्मकं सम्पन्नं शिक्षार्थिप्रशिक्षणम्- भगवानसिंहचौहानः

### शैक्षिकमार्गदर्शनस्य अधिगमकौशलविकासस्य च दिशि सार्थकः प्रयासः- जगदानंद झा

हिमसंस्कृतवार्ताः- लखनऊ, उत्तरप्रदेश- संस्कृतसंस्थानद्वारा आयोजितम् आवासीयं दशदिनात्मकं सरल- संस्कृतभाषा- शिक्षार्थिप्रशिक्षणं संस्थानपरिसरे संस्कृतमये च वातावरणे शुभारम्भं प्राप्नोत्। अस्मिन् अवसरे शिक्षाविदां, प्रशासनिकाधिकारिणां, शिक्षार्थिनां च गरिमामयी उपस्थितिः आसीत्। प्रशासनिकाधिकारी डॉ. जगदानन्दझा स्ववक्तव्ये संस्कृतभाषायाः समकालीनोपयोगितां तदीयसंरक्षणसंवर्धनस्य च आवश्यकतां प्रतिपादितवान्। सः अवदत् यत्संस्कृतभाषायाः प्रासङ्गिकता स्थापयितुं वयं सर्वे संस्कृतसम्बद्धाः जनाः उत्तरदायिनः स्मः। तदैव वयं समाजात् अपेक्षां कर्तुं शक्नुमः। प्रथमं स्वयमेव पूर्णतां प्राप्नुयाम, एतदेव मुख्योद्देश्यम् अस्ति।

प्रशिक्षणस्य मुख्यशिक्षकः धीरजमैठाणी अवदत् यद् अयम् उपक्रमः शिक्षार्थिनां आत्मविश्वासं, अभिव्यक्तिशक्तिम्, अध्ययनदक्षतां च दृढीकर्तुं सहायकः भविष्यति। वस्तुतः छात्राः संस्कृतग्रन्थानाम् अध्ययनकाले क्लिष्टताम् अनुभवयन्ति, तन्निवारणार्थं भाषाज्ञानम् अत्यावश्यकं भवति। अत एव संस्थानद्वारा शिक्षार्थिप्रशिक्षणमिदम् आयोजितम्। कार्यक्रमस्य अन्ते प्रशिक्षणाधिकारी प्रधानसहायकः भगवानसिंहचौहानः धन्यवादज्ञापनं कृतवान्। सोऽवदत् यत्सर्वेभ्यः प्रशिक्षुभ्यः अस्माकम् अपेक्षा अस्ति यत् ते स्वस्तरे संस्कृतभाषायाः प्रचारप्रसारं कुर्वन्तु, स्वयमेव प्रेरिताः सन्तः अन्यान् अपि प्रेरयेयुः। कार्यक्रमस्य आरम्भः संस्थानगीतिका पाठेन सवितामौर्यया कृतः। अवसरेऽमुष्मिन् शिक्षार्थिषु अभिषेकः, शिवा, अनुपमः, रोहितः, रानी,



शालिनी, शिवानी, अनुपममित्रः (अभिषेकः) इत्येतेषां द्वारा "संस्कृतज्वरः" नामकस्य नाटकस्य उत्साहपूर्णं मंचनं कृतम्। स्वागतभाषणं डॉ. अनिलगौतमेन कृतम्। प्रास्ताविकवक्तव्ये प्रशिक्षिका राधाशर्मा प्रशिक्षणस्य इतिवृत्तं प्रस्तुतवती। अस्मिन् अवसरे शिक्षार्थिनः अपि स्वानुभवं सहकृतवन्तः, अवदन् यत् एतादृशम् आवासीयप्रशिक्षणं संस्कृतभाषायां नवां दृष्टिं प्रेरणां च जनयन्ति।समापनसत्रस्य सञ्चालनं विपिनपाण्डेयः कृतवान्। वसन्तगीतं शिखा मिश्रया, मङ्गलाचरणम् अजय त्रिपाठिना, गीतिका आकाङ्क्षाचौहानेन, अभिनयगीतम् अग्रिमाशुक्लया, अनुभवकथनं शांभव्या, ओमप्रकाशमिश्रेण अनिलद्विवेदिना च प्रस्तुतम्। समापनं प्रशिक्षार्थिन्या नन्दिन्या शान्तिमन्त्रपाठेन कृतम्।

# रामनगरमहाविद्यालयस्य डॉ. मूलचन्द्रशुक्लः विद्यावाचस्पति- मानदोपाधिना समलङ्कृतः




**हिमसंस्कृतवार्ताः- डॉ. अभिषेकपाण्डेयः, रामनगरम्।** संस्कृतवाङ्मयस्य साधनायां निरतः, शास्त्राध्ययन- अध्यापनयोः निष्ठावान्, रामनगरस्थिते पी. एन. जी. राजकीय- स्नातकोत्तर- महाविद्यालये संस्कृतविभागे प्रभारी वरिष्ठः सहायकाचार्यः डॉ. मूलचन्द्रशुक्लः, संस्कृतोच्चशिक्षाक्षेत्रे स्वस्यै दीर्घकालिकोत्कृष्टसेवायै गौरवस्वरूपं डी. लिट. (विद्यावाचस्पतिः) इति मानदोपाधिना समलङ्कृतः।

एष मानदोपाधिः वाराणसेय- काशी- हिन्दी- विद्यापीठेन अस्मै विशेष- मानद- सम्मानसमारोहावसरे प्रदत्तः। वाराणस्यां मालवीयसभागारे सम्पन्ने गरिमामये समारोहे बहूनां प्रख्यातानां शिक्षाविदां, साहित्यकाराणां, प्रशासनिकाधिकारिणां च करकमलैः डॉ. शुक्लः सम्मानितोऽभवत्। तत्र समारोहस्य मुख्यातिथिः अन्ताराष्ट्रियख्यातिलब्धः कविः डॉ. हरेन्द्रहर्षः, अध्यक्षः प्रख्यातसाहित्यकारः डॉ. ओमप्रकाशद्विवेदी ‘ओम’, संरक्षकः सेन्ट्रल- बार- एसोसिएशन- वाराणसीयोऽध्यक्षः काशीसेवासमितेः, साहित्यभूषणश्च डॉ. रामावतारपाण्डेय आसन्। विशिष्ट- अतिथिषु डॉ. चन्द्रभालसुकुमारः, कर्नल डॉ. आदिशङ्करमिश्रः, प्रकाशश्रीवास्तवः ‘गणेशः’, काशी- हिन्दी- विद्यापीठस्य कुलसचिवः इन्द्रजीततिवारी विशेषरूपेण उपस्थिता आसन्। समुल्लेखनीयं वर्तते यत् विद्यावाचस्पति- पुरस्कारः– २०२६ इत्यस्य कृते जनवरीमासस्य २५ दिनाङ्के काशी- हिन्दी- विद्यापीठेन चयनं कृत्वा अस्मै संस्कृतविदुषे डॉ. मूलचन्द्रशुक्लाय एषः मानदोपाधिः समर्पितः। संस्कृतविषये उच्चशिक्षायामध्यापने, शास्त्र- सनातन- परम्परासंरक्षण- अकादमिकसेवा- इत्यादिषु विविधक्षेत्रादिषु कृतं तस्य विशिष्टमवदानमेव अस्य सम्माननस्य मूलाधारः। डॉ. मूलचन्द्रशुक्लः विगतद्वादशवर्षेभ्यः संस्कृताध्यापनस्य पुण्यकार्ये समर्पितचित्तो दरीदृश्यते। सम्प्रत्येषः महाविद्यालये संस्कृतविभागे प्रभारीरूपेण कार्यं कुर्वन्, योग- समन्वयकत्वेन सह बहूनि शैक्षिक- सहशैक्षिक- दायित्वानि अत्यन्तं कौशलपूर्वकं निर्वहन् अग्रेसरति। अयं संस्कृतस्य विविधपूर्वसम्पादित- समुत्कृष्टकार्याणामुपलक्ष्ये पूर्वमपि द्वाभ्यां राष्ट्रिय-अन्ताराष्ट्रिय- पुरस्काराभ्यां सम्मानितो जातः। अस्य गौरवपूर्णस्योपलब्धिप्रसङ्गे महाविद्यालयस्य प्राचार्यः प्रो. एम. सी. पाण्डेयः, मुख्य-प्रॉक्टर प्रो. एस. एस. मौर्यः, प्रभारी-प्राचार्यः डॉ. दीपकखाती, डॉ. डी. एन. जोशी, डॉ. मुरलीधरकापड़ी, डॉ. नितिनढोमने, गोविन्दसिंह जंगपांगी च इत्यादयो नैके प्राध्यापकाः शिक्षणेतरकर्मचारिणश्च हर्षोल्लासेन सह हार्दिकाः शुभाशंसाः प्रेषितवन्तः। अस्मिन्नवसरे भारतीय- विधिक- शिक्षा- आन्दोलनस्य राष्ट्रिय- समन्वयकः समरबहादुर सरोजः, लब्धख्यातः गीतकारः भजनगायकश्च राजकुमार- आशीर्वादः, सन्मार्ग- हिन्दी- सान्ध्य- दैनिकस्य पत्रकारो विजयकुमारगुप्तः, विन्ध्याचलात् समायातः स्वामी ब्रह्माण्डभैरवशरणः, डॉ. चन्द्रकान्तमिश्रः, विजयनारायणतिवारी सहिताः नैके प्रथिताः जनाः, गणमान्यसज्जनाः, सम्मानिताः विद्वांसश्च उपस्थिता आसन्।

# केन्द्रीयसंस्कृतविश्वविद्यालयस्य भोपालपरिसरे राज्यस्तरीयशास्त्रप्रतियोगितानामुद्घाटनम्





**(हिमसंस्कृतवार्ताः- प्रवेशकुमारशुक्लः, भोपालम्)**
केन्द्रीय- संस्कृत- विश्वविद्यालयस्य भोपालपरिसरे राज्यस्तरीय- शास्त्रप्रतियोगितानाम् आयोजनमभवत्। कार्यक्रमस्य आरम्भः सरस्वतीवन्दनाद्वारा कृतः। ततः दीपप्रज्वलनं, वैदिकमङ्गलाचरणं, कुलगीतं च क्रमशः सम्पन्नानि। कार्यक्रमस्य प्रारम्भिकचरणे अतिथीनाम् औपचारिक- स्वागतसम्मानञ्च कृतम्। आयोजनस्य संयोजकः प्रो. प्रदीपकुमारपाण्डेयः कार्यक्रमस्य प्रस्तावनां प्रदर्शयन् उक्तवान् यत् एतेषु प्रतियोगितासु छात्रेषु संस्कृतभाषायाः प्रति रुचि जाग्रतिः स्यात्, तेषां प्रतिभा सशक्तमञ्चे प्रदत्तास्ति, आत्मविश्वासश्च भाषादक्षता च विकासं प्राप्नुवन्ति। सः अपि उक्तवान् यत् संस्कृतभाषा राष्ट्रचेतनायाः सुदृढीकरणे महती भूमिका वहति। केन्द्रीय- संस्कृत- विश्वविद्यालयस्य भोपालपरिसरः संस्कृति- उत्थानस्य मार्गे सततं प्रशंसनीयां भूमिकां वहति। एषः परिसरः संस्कृतभाषायाः, भारतीयज्ञानपरंपरायाः तथा सांस्कृतिकमूल्यानां संरक्षणेसंवर्धने च सशक्तकेंद्ररूपेण उदितः। शैक्षिकगतिविधयः, प्रतियोगिताः, संगोष्ठयः, अकादमिकाः आयोजने च छात्रेषु सांस्कृतिकचेतना, नैतिकमूल्यानि तथा राष्ट्रीयभावनां सुदृढं कुर्वन्ति। भोपालपरिसरे क्रियमानाः प्रयासाः न केवलं संस्कृतशिक्षां सशक्तवन्ति, अपि तु भारतीयसंस्कृतेः व्यापकप्रचारप्रसारे अपि महत्वपूर्णं योगदानं ददाति। प्रतियोगितासत्रे छात्राः विविधेषु संस्कृतविधासु उत्साहपूर्णं सहभागं कृतवन्तः। अस्मिन अवसरि डॉ. महेशदासः स्वविचाराणि व्यक्तयन् उक्तवान् यत् संस्कृतभाषा भारतीयजीवनमूल्यानाम्, अनुशासनस्य, तार्किकचिन्तनस्य च आधारशिला अस्ति। राष्ट्रोत्थाने च अस्य योगदानम् अत्यन्तं महत्वपूर्णम्। अग्निसत्रे प्रो. ब्रजभूषणओझा, वाराणसी विषयगतं व्याख्यानं प्रस्तुतवान्। सः उक्तवान् यत् संस्कृताधारिताः प्रतियोगिताः छात्रान् स्वस्य सांस्कृतिकमूलेभ्यः सम्बद्धयन्ति तथा राष्ट्रनिर्माणे चेतनां सुदृढयन्ति। सम्पूर्णानन्द- संस्कृत- विश्वविद्यालयात् आगतः प्रो. अमितकुमारशुक्लः उक्तवान् यत् श्लोकपाठः, भाषणं, लेखनं, प्रश्नोत्तरीश्च प्रतियोगितासु छात्रेषु अभिव्यक्तिकौशलस्य, बौद्धिकविकासस्य, भाषानुशासनस्य समुचितविकासं कुर्वन्ति। मुख्यातिथित्वेन महर्षिपाणिनिसंस्कृत एवं वैदिक विश्वविद्यालयस्य प्रो. शिवशंकरमिश्रः, कुलपतिः स्वसंबोधनं कृत्वा उक्तवान् यत् संस्कृतभाषा भारतीयज्ञानपरंपरायाः मूलाधारम् अस्ति। सः अपि उक्तवान् यत् संस्कृतस्य संरक्षणं, संवर्धनं च राष्ट्रीयोत्थानस्य, सांस्कृतिकपुनर्जागरणस्य तथा चरित्रनिर्माणस्य दिशायाम् सशक्ताधारं प्रददाति। भोपालपरिसरे निदेशकः प्रो. सुबोधशर्मणः अध्यक्षीयोद्बोधनं कृत्वा उक्तवान् यत् एतेषु शैक्षिकप्रतियोगितात्मक- आयोजनानि छात्रेषु अनुशासनं, नेतृत्वकौशलं, राष्ट्रप्रेमभावनां विकसयन्ति। कार्यक्रमस्य समापनसत्रे रागिनीशर्मा कृतज्ञताज्ञापनं प्रस्तुतवती। कार्यक्रमे उपस्थिताः आचार्याः प्रो. गोविंदकुमारपाण्डेयः, प्रो. अशोककुमारकक्षवाहः, प्रो. सोमनाथसाहुः, प्रो. नितिनकुमारजैनः आसीताम्, येषां गरिमामयी उपस्थिति कार्यक्रमस्य शैक्षिकमहत्तां च वर्धयत।



**हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः**

# वार्तासंवादः

**नन्दिनीः** नमो वः। अद्यतने वार्ता- कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्याः** नमस्ते नन्दिनि। श्रूयताम्, एकेन प्रवासी- भारतीयेन अमेरिकादेशः 'नीरसः' इति कथितम्। तेन बेङ्गलूरुनगरस्य सजीवता स्मृता।

**नन्दिनीः** एतत् तु सत्यं स्यात्। किन्तु अन्यत्र, विमान- यात्रायाम् एकया महिलायात्रिकया अनुचितव्यवहारः कृतः।

**काव्याः** किं भूतम्? तया किं कृतम्?

**नन्दिनीः** तया अग्रिम-आसन्दस्य शीर्ष-भागे पादौ स्थापितौ। अतः सह-यात्रिकैः कलहः कृतः।

**काव्याः** अहो, तद् जुगुप्सितम्। परन्तु, ब्रिटेनदेशे द्विवर्षीयेन बालकेन दण्ड-गोल-क्रीडायां (Snooker) विश्वविक्रमः रचितः।

**नन्दिनीः** अति-सुन्दरम्! सः बालकः प्रतिभावान्। अन्ते, एकेन उद्यमिना अस्माकं गगन-यात्री शुभांशुशुक्लः मिलितः।

**काव्याः** उत्तमम्। तेन उद्यमिना शुभांशुमहोदयस्य विनम्रता श्लाघिता।

# हास्यकणिका

**चतुरः शिष्यः (चतुर शिष्य)** **शिक्षकः:** "भो छात्र! वद, पृथिवी गोलाकारा अस्ति वा अण्डाकारा?"
**छात्रः:** "महोदय, मम पितामहः तु कथयति यत् पृथिवी 'ऋणाकारा' अस्ति।"
**शिक्षकः:** (आश्चर्येण) "ऋणाकारा? तत् कथं?" **छात्रः:** "यतः सः वदति—'सर्वं जगत् ऋणं गृहीत्वा एव जीवति!'"

# "व्याघ्रचोरधनुर्न्यायः"



व्याघ्रः चोरः धनुः इति त्रयः अपि स्वकर्मणः सिद्धिं प्राप्तुम् अवनताः भवन्ति। अवनमनम् इति तेषां स्वभावः न। एवं नीचाः अपि स्वार्थसंपादनाय अवनताः भवन्ति। अतः अवनतिः इति वञ्चकी अपि भवितुम् अर्हति इति भावः।

**डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**

**"लौकिकन्यायकोशः"**

# भारतीयभाषाणां निनादः- राष्ट्रियसंगोष्ठ्यां विदुषां सार्थकसंवादः




## श्रीभगवानदास- आदर्श- संस्कृत- महाविद्यालये आयोज्यते द्विदिवसीया संगोष्ठी

**हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला, हरिद्वारम्।** भारतीयभाषाणां समृद्धां परम्परां केन्द्रीयकृत्वा हरिद्वारे श्रीभगवानदास– आदर्श- संस्कृत- महाविद्यालये (केन्द्रीय- संस्कृत- विश्वविद्यालयसम्बद्धे) द्विदिवसीया राष्ट्रिय- भाषा- शोधसंगोष्ठी भव्यतया आयोजिताभवत्। भारतीय- भाषासमितेः आर्थिकसहयोगेन "भारतीय- भाषापरिवार- सम्मेलनम् (Conference on Indian Linguistic Heritage)" इति शीर्षकेन एषा संगोष्ठी दिनाङ्के २९– ३० जनवरी २०२६ तमे महाविद्यालयपरिसरे संजायते।कार्यक्रमस्य संरक्षकः प्रो. श्रीनिवासवर्खेड़ी (कुलपतिः, केन्द्रीय- संस्कृत- विश्वविद्यालयः), परामर्शकः प्रो. यशवीरसिंहः (अध्यक्षः, प्रबन्धसमितिः) सम्मेलननिदेशकः डॉ. रविन्द्रकुमारः (प्रभारीप्राचार्यः) इत्येषां गरिमामय्याम् उपस्थितौ द्विदिवसीया एषा राष्ट्रियसंगोष्ठी सम्पद्यते।दिनाङ्के २९ जनवरी २०२६ (गुरुवासरे) प्रातः १० वादने आयोजितस्य उद्घाटनसत्रस्य अध्यक्षतां प्रो. यशवीरसिंहः अकरोत्। मुख्यातिथिरूपेण डॉ. रमेशपाण्डेयशास्त्री (पूर्वशिक्षानिदेशकः, भारतसरकारः) उपस्थितः आसीत्। विशिष्टातिथिषु प्रो. मनीषकुमारपाण्डेयः (कुलपतिः, फोनीक्स- विश्वविद्यालयः) प्रो. शीतलनाथमिश्रः (पूर्वकुलपतिः, हिमाचलविश्वविद्यालयः) समुपस्थिताः आसन्। कार्यक्रमसञ्चालनं श्रीमान् कृष्णदेवराणामहोदयः (निदेशकः, संस्कृतशिक्षा– उत्तराखण्डम्) अकरोत्। सरस्वतीवन्दनां प्रो. वेदप्रकाशोपाध्यायः (राष्ट्रपतिसम्मानितः संस्कृतविद्वान्) सुमधुरतया प्रस्तुतवान्। सम्मेलनान्तर्गतं शोधपत्रवाचनसत्राणि अपि आयोजितानि, येषु देशस्य विविधविश्वविद्यालयेभ्यः आगताः विद्वांसः स्वस्वशोधपत्राणि प्रस्तुतवन्तः। दिनाङ्के ३० जनवरी २०२६ (शुक्रवासरे) आयोजितस्य शोधपत्रवाचनसत्रस्य अध्यक्षता डॉ. भोलाशंकरमहोदया, मुख्यातिथिरूपेण गिरिशकुमार अवस्थी (कुलसचिवः, उत्तराखण्ड- संस्कृत- विश्वविद्यालयः) विशिष्टातिथिरूपेण योगेन्द्रविद्यार्थीमहोदयः (संस्कृतभारती) सत्रं सभालंकरिष्यन्ति। समापनसत्रस्य अध्यक्षता प्रो. यशवीरसिंहः, मुख्यातिथिरूपेण डॉ. रमेशकुमारपाण्डेयः (पूर्वकुलपतिः, अखिलभारतीय- भाषा- संस्कृतिसंस्थानम्), विशिष्टातिथिषु दीपककुमार अग्रवालः (संस्कृतसचिवः, उत्तराखण्डशासनम्), डॉ. पदमाकरमिश्रः, डॉ. ओमप्रकाशशुक्लः प्रमुखतया उपस्थिताः वर्तन्ते। अस्मिन् सम्मेलने देशस्य विविधप्रदेशेभ्यः आगताः प्रख्याताः संस्कृतविद्वांसः, शिक्षाविदः, शोधकर्तारः, विश्वविद्यालयानाम् आचार्यगणाः गरिमामयीम् उपस्थितिं प्रकटितवन्तः। कार्यक्रमसंयोजकमण्डले डॉ. मञ्जूपटेलः, डॉ. आशिषमाश्रवणः समाविष्टौ, आयोजनसमित्यां च अनेके प्राध्यापकाः शोधार्थिनः च सक्रियां भूमिकां निर्वहन्ति स्म। आयोजकैः संस्कृतभारतीयभाषाभ्यां भाषावैभवसमृद्धिं च प्रति रुचिं वहन्तः विद्वांसः, शोधार्थिनः, विद्यार्थिनः सम्मेलनसहभागितां कर्तुं विनीततया आमन्त्रिताः अत्र वर्तन्ते।अस्मिन् अवसरे मंचासीनैः अतिथिभिः संयुक्तरूपेण पत्रिकायाः विमोचनं कृत्वा भारतीयभाषाणां संरक्षण- संवर्धनयोः आवश्यकता प्रतिपादिता। वक्तारः अवदन् यत् भारतीयभाषाः केवलं संवादस्य साधनानि न, अपि तु अस्माकं सांस्कृतिकचेतनायाः बौद्धिकपरम्परायाश्च वाहिकाः सन्ति। नवशिक्षानीत्याः अन्तर्गतं मातृभाषायाः भारतीयभाषाणां च प्रोत्साहनं सकारात्मकं संकेतम् इति अपि ते अवोचन्। संगोष्ठ्यां देशस्य विविधराज्येभ्यः आगताः भाषाविशेषज्ञाः, शोधार्थिनः, शिक्षकाः च भारतीय- भाषा- समृद्धिसम्बद्धेषु नानाविषयेषु स्वविचारान् प्रस्तुतवन्तः।

# मुख्यमन्त्री खेलमहाकुम्भस्य पदकस्पर्धायां पौड़ी- गढ़वालजनपदस्य क्रीडकैः उत्कृष्टं प्रदर्शनम्






**हरिद्वारम्। कुलदीपमैन्दोला।** खेलमहाकुम्भस्य मुख्यमन्त्रिणः पदकस्पर्धायाः अन्तर्गतं हरिद्वारे आयोजितायां राज्यस्तरीयायां योगासनप्रतियोगितायां पौड़ी-गढ़वालजनपदस्य क्रीडकैः उत्कृष्टं प्रदर्शनं कृत्वा जनपदस्य नाम गौरवेन अलङ्कृतम्।प्रतियोगितायां रजतपदकं प्राप्तवन्तौ — सार्थकः कण्डवालः तथा सागरः। तथैव कांस्यपदकं प्राप्तवन्तः — मेघा, प्रियांशी, आराध्यः, वैष्णवी, देवांशः शाहः तथा दर्शः शुण्डली इति क्रीडकाः।एषा उपलब्धिः क्रीडकेषां कठोरपरिश्रमस्य, अनुशासनस्य, निरन्तराभ्यासस्य च प्रतिफलरूपा अस्ति। योगविद्यायां तेषां निष्ठा समर्पणं च एतस्मिन् प्रशंसनीये सफलतायां स्पष्टतया दृष्टिगोचरं जातम्। राजकीयवरिष्ठमाध्यमिकविद्यालयस्य पौडीजनपदस्य प्रशिक्षकस्य राकेशकण्डवालस्य मार्गदर्शने विभिन्नाः छात्राः सर्वोत्कृष्टप्रदर्शने अधुना सर्वत्र संलग्नाः सन्ति। योगासनक्रीडायां पौड़ी-गढ़वालजनपदस्य एतादृशं प्रभावशालीं प्रदर्शनं राज्यस्तरे योगक्रीडायाः उज्ज्वलभविष्यस्य संकेतकं मन्यते। प्रतियोगितायाः समापनावसरे सर्वे विजेतृक्रीडकाः अभिनन्दिताः, तेषां उज्ज्वलभविष्याय च शुभाशयाः

# भक्तिवेदान्तपरिसरे दशदिवसीया संस्कृत- सम्भाषण- कार्यशाला सम्पन्ना



**हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः,** वृन्दावनम्, उत्तरप्रदेशः। भक्तिवेदान्तपरिसरेलोकभाषाप्रचारसमितेःसंयुक्ततत्त्वावधानेन संस्कृतसम्भाषणकार्यशाला भव्यतया आयोजिता। सम्भाषणवर्गस्य उद्घाटनसमारोहः १९ दिनांके पूर्वाह्णे ११ वादनतः प्रारब्धः। उद्घाटनसमारोहस्य आरम्भः परिसरस्य कृष्णसुदामासभागृहे जातः। अद्यतनीय समापनसमारोहकार्यक्रमस्य सञ्चालनं स्पर्धायाः सहसंयोजकरूपेण डॉ. निशिकान्तपाण्डेयः सफलतया निर्वाहितवान्। कार्यक्रमेऽस्मिन् मुख्यातिथयः आसन् उत्तरप्रदेशतः सम्पूर्णानन्द- संस्कृत- विश्वविद्यालयस्य तुलनात्मक- दर्शनविभागस्य भूतपूर्वः प्राध्यापकः प्रो. हरिप्रसाद- अधिकारी, बिहारप्रदेशात् छपरा विश्वविद्यालयस्य संस्कृतविभागस्य भूतपूर्वः अध्यक्षः प्रो. बैद्यनाथमिश्रः, राजस्थानप्रदेशात् लोकभाषाप्रचारसमितेः राष्ट्रिय- उपाधक्षः डॉ. निरञ्जनसाहुः, ओडिशा प्रदेशात् लोकभाषाप्रचारसमितेः संस्थापकः डॉ. सदानन्ददीक्षितः, असमप्रदेशात् लोकभाषाप्रचारसमितेः राष्ट्रियसम्भाषणसचिवा डॉ. सागरिका भट्टाचार्यः च। प्रमुखतया उपस्थितौ आस्ताम् अस्य परिसरस्य निदेशकः श्रीमान् राधाकान्तप्रभुः, भक्तिवेदान्तविद्यालयस्य प्राचार्या श्रीदेवी महापात्रः च। तैः स्पर्धायां समागतेभ्यः सर्वेभ्यः प्रतिभागिभ्यः हार्दिकं स्वागतं कृतम्, संस्कृतशास्त्राणां संरक्षणेप्रसारे च एतादृशीनां प्रतियोगितानां महत्त्वं प्रतिपादितं च। तदनन्तरं लोकभाषाप्रचारसमितेः संस्थापकः डॉ. सदानन्ददीक्षितः अपि स्वीयं प्रोत्साहनवचनं प्रकटितवान्। विचारकत्वेन अध्यक्षः प्रो. हरिप्रसाद अधिकारीमहोदयः, लोकभाषाप्रचारसमितेः राष्ट्रियोपाध्यक्षः डॉ. निरञ्जनसाहुः, छपरा विश्वविद्यालयस्य संस्कृतविभागस्य भूतपूर्वः अध्यक्षः प्रो. बैद्यनाथमिश्रः, लोकभाषाप्रचारसमितेः राष्ट्रियसम्भाषणसचिव डॉ. सागरिका भट्टाचार्य उपस्थिताः आसन्। उद्घाटनसत्रानन्तरं विविधविषयेषु बह्व्यः स्पर्धाः आयोजिता आसन्। तासु प्रमुखतया गीताकण्ठस्थीप्रतियोगिता, संस्कृसम्भाषणम्, प्रश्नोत्तरीप्रतियोगिता इत्यादयः अन्तर्भूताः आसन्। एतासु स्पर्धासु आधुनिक- विद्यालयस्य छात्राः, गुरुकुलस्य छात्राः च प्रतिभागीरूपेण उत्साहपूर्वकं भागं गृहीतवन्तः। परिसरस्य सर्वाः स्पर्धाः अतीव सुव्यवस्थिततया सञ्चालिताः। समग्रकार्यक्रमः संस्कृतविद्याया जीवंतपरम्परां सुदृढीकुर्वन् प्रतिभानां संवर्धने महत्त्वपूर्णं योगदानं विदधाति। अत्र प्रायः ११५ जनाः उपस्थिताः आसन्।